श्री गंगाधर स्तोत्रं

श्री गंगाधर स्तोत्रं

क्षीरांभोनिधिमंथनोद्भवविषात् संदह्यमानान् सुरान्
ब्रह्मादीनवलोक्य यः करुणया हालाहलाख्यं विषं |
निःशंकं निजलीलया कवलयन्लोकानुरक्षादरा-
-दार्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः || 1 ||

क्षीरं स्वादु निपीय मातुलगृहे गत्वा स्वकीयं गृहं
क्षीरालाभवशेन खिन्नमनसे घोरं तपः कुर्वते |
कारुण्यादुपमन्यवे निरवधिं क्षीरांबुधिं दत्तवान्
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः || 2 ||

मृत्युं वक्षसि ताडयन् निजपदध्यानैकभक्तं मुनिं
मार्कंडेयमपालयत् करुणया लिंगाद्विनिर्गत्य यः |
नेत्रांभोजसमर्पणेन हरयेऽभीष्टं रथांगं ददौ
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः || 3 ||

व्यूढं द्रोणजयद्रथादिरथिकैः सैन्यं महत् कौरवं
दृष्ट्वा कृष्णसहायवंतमपि तं भीतं प्रपन्नार्तिहा |
पार्थं रक्षितवानमोघविषयं दिव्यास्त्रमुद्बोधयन्
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः || 4 ||

बालं शैवकुलोद्भवं परिहसत् स्वज्ञातिपक्षाकुलं
खिद्यंतं तव मूर्ध्नि पुष्पनिचयं दातुं समुद्यत्करं |
दृष्ट्वाऽऽनम्य विरिंचिरम्यनगरे पूजां त्वदीयं भजन्
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः || 5 ||

संत्रस्तेषु पुरा सुरासुरभयादिंद्रादिबृंदारके-
-ऽश्वारूढो धरणीरथं श्रुतिहयं कृत्वा मुरारिं शरं |
रक्षन् यः कृपया समस्तविबुधान् जित्वा पुरारीन् क्षणात्
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः || 6 ||

श्रौतस्मार्तपथे पराङ्मुखमपि प्रोद्यन्महापातकं
विश्वातीतमपि त्वमेव गतिरित्यालापयंतं सकृत् |
रक्षन् यः करुणापयोनिधिरिति प्राप्तप्रसिद्धिः पुरा
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः || 7 ||

गांगं वेगमवाप्य मान्यविबुधैः सोढुं पुरा याचितो
दृष्ट्वा भक्तभगीरथेन विनतो रुद्रो जटामंडले |
कारुण्यादवनीतले सुरनदीमापूरयत् पावनीं
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः || 8 ||

इति श्रीमदप्पयदीक्षितविरचितं श्री गंगाधर स्तोत्रं |